International Journal of Sanskrit Research 2015; 1(7): 60-62

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(7): 60-62
© 2015IJSR
www.sanskritjournal.com
Received: 03-09-2015
Accepted: 06-10-2015

**प्रीतम रुजः**
गवेषकः, विश्वभारती, शान्तिनिकेनम्
संस्कृत-पालि-प्राकृत विभागः

**Correspondence**
**प्रीतम रुजः**
गवेषकः, विश्वभारती, शान्तिनिकेनम्
संस्कृत-पालि-प्राकृत विभागः

# अलंकारसर्वस्वे परिणामालंकारचिन्तने रुय्यकस्य मौलिकता

**प्रीतम रुजः**

सूत्र-वृत्तात्मकस्य अलंकारसर्वस्वस्य रचयिता राजानकः रुय्यकः ख्रीष्टाव्दीय द्वादशशतकस्य पूर्वार्द्धे काश्मीरदेशेऽविद्यत। तस्यापरनाम राजानकरुचकः इत्यपि आसीत्। तस्य पित्रा राजानकतिलकेन ‘उद्भटविवेकः’ इति ग्रन्थः विरचितः। श्रीकण्ठचरितकारः मङ्खकः काव्यस्यान्तिमे सर्गे रुय्यकमेवं स्वगुरुरूपेण वर्णयति। रुय्यकप्रतिपादितेषु ग्रन्थेषु ‘अलंकारसर्वस्वम्’ इति अलंकारग्रन्थः अन्यतमः। ग्रन्थेऽस्मिन् षट्सप्तत्यर्थालङ्काराः षट् शव्दालंकाराश्च रुय्यकेन प्रतिपदिताः। रुय्यकप्रतिपादितेषु नवीनार्थालंकारेषु परिणामालंकारः अन्यतमः इति। आचार्यभरतादारभ्य रुय्यकपूर्वकालपर्यन्तं न केनापि परिणामालंकारः स्वीकृतः। परं रुय्यकेन अलंकारसर्वस्वे अन्यालंकारेभ्यः पृथकविषयरूपेण ‘परिणाम’नामकस्य एकस्य नवीनालंकारस्य मौलिकत्वम् उपस्थापितम्। परिणामालंकारस्य लक्षणे रुय्यकेनोक्तम्-

“आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः।”

अर्थात् यत्र उपमेये उपमानस्य उपयोगो भवति तत्र परिणामालंकारः स्यात्। आरोप्यमाणं रूपके प्रकृतोपयोगित्वाभावात् प्रकृतोपरञ्जकत्वेनैव केवलम् अन्वयं भजते। परन्तु परिणामे प्रकृतात्मतया आरोप्यमाणस्योपयोग इति प्रकृतमारोप्यमाणरूपत्वेन परिणमति। प्रसङ्गेऽस्मिन् वयं विमर्शिनी-सञ्जीवनीनामकस्य टीकाद्वयस्य सहायतां नीत्वा परिणामतत्वे रुय्यकस्य या मौलिकता-तां विश्लेषणपूर्वकम् आविष्कर्तुं यतामः। एवम्प्रकारेण रुय्यकस्य परिणामालंकारस्य एकं सार्विकं समीक्षणं मम सन्दर्भस्यास्य विषयः।

**कुञ्जिशव्दाः** प्रकृतोपयोगः, औचित्यम्, उपरञ्जकम्, अप्रच्युतम्, आरोप्यमाणम्

सूत्र-वृत्तात्मकस्य अलङ्कारसर्वस्वस्य रचयिता राजानकः रुय्यकः ख्रीष्टाव्दीय द्वादशशतकस्य पूर्वार्द्धे काश्मीरदेशेऽविद्यत। तस्यापरनाम राजानकरुचक इत्यपि आसीत्। तस्य पित्रा राजानकतिलकेन ‘उद्भटविवेकः’ इति ग्रन्थः विरचितः। पिता राजानकतिलकः रुय्यकस्य अलङ्कारशिक्षायाः गुरुरासीत्। अस्मिन् विषये काव्यप्रकाशस्य संकेतटीकायां रुय्यकेनोक्तम्-

“ज्ञात्वा श्रीतिलकात् सर्वालङ्कारोपनिषत्क्रमम्।
काव्यप्रकाशसङ्केतो रुचकेनेह लिख्यते।।”

अतः रुय्यकस्य शिक्षा-दीक्षा तस्य पितुः समीपे अभवत्- इति प्रमाणितम्। अलङ्कारसर्वस्वमित्याख्यस्य ग्रन्थस्य सञ्जीवनीटीकाकारः श्रीविद्याचक्रवर्ती आह-

“रुचकाचार्योपज्ञे सेयमलङ्कारसर्वस्वे।
सञ्जीवनीति टीका श्रीविद्याचक्रवर्तिना क्रियते।।” [1] पुनः अन्तिमे

[1] अलङ्कारसर्वस्वम्- रुय्यकः,सम्पा, कुमारी एस्.एस्.जानकी पृष्ठा-१

श्लोकेऽपि तेनोक्तम्- "इत्थं भूम्ना रुचकवचसां विस्तरः कर्कशोऽयम्।" [2] अस्मात् श्लोकात् राजानकरुय्यकस्य अपरनाम 'रुचक' इति प्रमाणितम्। 'सहृदयलीला' नामकस्य ग्रन्थस्यालोचनावसरे डा: पिशेलमहोदयेन रुचक-रुय्यकप्रसङ्गे उक्तम्-

"कृतिः श्रीविपश्चिद्वर-राजानकतिलकात्मज-श्रीमदालङ्कारिक-समाजाग्रगण्य-श्रीराजानक-रुय्यकस्य राजानक-रुचकापरनाम्नोऽलङ्कारसर्वस्वकृतः।" [3] सुतरां तेनापि रुय्यकस्य अपरनाम रुचक इति स्वीकृतः। श्रीकण्ठचरितकारः मङ्खकः काव्यस्यान्तिमे सर्गे रुय्यकमेवं स्वगुरुरूपेण वर्णयति-

"तं श्रीरुय्यकमालोक्य स प्रियं गुरुमग्रहीत्।
सौहार्दप्रश्रयरसस्रोतः संभेदमज्जनम्॥" [4]

राजानकरुय्यक एकः प्रख्यातः आलङ्कारिकः। तेन प्रतिपादितेषु ग्रन्थेषु पञ्चग्रन्थाः प्रकाशिताः। तन्मध्ये 'अलङ्कारसर्वस्वम्' इति अलङ्कारग्रन्थ अन्यतमः। अलङ्कारसर्वस्वम् इतस्य ग्रन्थस्य त्रयो भागाः दृश्यन्ते- सूत्रं, वृत्तिः उदाहरणञ्च। सूत्राणि गद्येन रचितानि। सूत्रांशे मूलतः अलङ्काराणां लक्षणसमूहाः निरूपिताः। वृत्तिभागे लक्षणसमूहाः विश्लेषिताः। उदहरणानि तु प्रसिद्धग्रन्थेभ्यः उद्धृतानि इति। ग्रन्थेऽस्मिन् षट्सप्तत्यर्थालङ्काराः षट्शब्दालङ्कारश्च रुय्यकेन प्रतिपादिताः। रुय्यकप्रतिपादितेषु नवीनार्थालङ्कारेषुपरिणामालङ्कारः अन्यतमः इति। आचार्यभरतादारभ्य रुय्यकपूर्वकालपर्यन्तं न केनापि परिणामालङ्कारः स्वीकृतः। परं रुय्यकेन अलङ्कारसर्वस्वे अन्यालङ्कारेभ्यः पृथकविषयरूपेण 'परिणाम' नामकस्य एकस्य नवीनालङ्कारस्य मौलिकत्वमुपस्थापितम्।

परिणामालङ्कारस्य लक्षणे रुय्यकेनोक्तम्- "आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" [5] अर्थात् यत्र उपमेये उपमानस्य उपयोगो भवति तत्र परिणामालङ्कारः स्यात्। रूपकालङ्कारे उपमेये उपमानस्य अभेदारोपो भवति, अर्थात् रूपके आरोप्यमाणं प्रकृतोपयोगित्वाभावात् प्रकृतोपरञ्जकत्वेनैव केवलम् अन्वयं भजते, परन्तु परिणामालङ्कारे आरोप्यमानस्य प्रकृतात्मतया उपयोगो भवति। स एव अस्यालङ्कारस्य जीवितम्। उदाहरणं यथा "मुखचन्द्रः विरहतापं शमयति" इत्युदाहरणे प्रकृतं मुखं, तत्रोपयोगित्वं वाक्यार्थानुप्रवेशपर्यन्तमारोपणविवक्षायां स्यात्। तद्धि रूपके नास्ति। 'मुखमेव चन्द्र' इति एतावतैव रूपकत्वस्य सिद्धिः। सुतरां रूपकालङ्कारे चन्द्रादि आरोप्यमाणे मुखादौ प्रकृतार्थे च ताद्रूप्यप्रतीत्याधानरू-पेण उपरञ्जकत्वेनैव अन्वयं भजते। परन्तु परिणामालङ्कारे आरोप्यमाणं केवलं प्रकृतार्थस्य शोभावर्धकमेव न भवति, अपि तु अत्र आरोप्यमाणं प्रकृतविषये आत्मते-नोपयुज्यते। रूपके आरोपविषयः स्वरूपं परित्यजति, परिणामे तु न। अतः परिणा-मालङ्कारे प्रकृतम् आरोप्यमाणरूपत्वेन परिणमति। सुतराम् अस्मिन् अलङ्कारे प्रकृतम् अप्रकृतव्यवहारविशिष्टतया अवतिष्ठते। यदि केवलं प्रकृतस्वरूपमात्रावस्थाने प्रस्तुतं भवति, तर्हि प्राकरणिकार्थस्य निष्पत्तिः न स्यात्। एवमत्र प्रकरणोपयोगित्वा-भावादित्यारोप्यमाणस्योपयोग इति चान्वयव्यतिरेकाभ्यां अन्यालङ्कारात् परिणामा-लङ्कारे प्रकृतोपयोगित्वस्य असाधारणत्वं दर्शितम्। अन्यालङ्कारेषु नास्ति प्रकृतोप-योगित्वम्। इदं प्रकृतोपयोगित्वमेव परिणामालङ्कारस्य सौन्दर्यमिति।

उपमा-रूपकवदादि अन्यालङ्कारेषु औचित्यमेवास्ति, न उपयोगः। औचित्यं हि सिद्धस्य सतः प्रकृतार्थोपरञ्जकं भवति। परन्तु उपयोगः पुनः सिद्धावेव प्रकृतार्थहेतुतां भजते- इति अनयोः औचित्योपयोगयोः महान् भेदः। अस्य भेदस्य निरूपणे अलङ्कारसर्वस्वस्य टीकाकारः आचार्यजयरथः तस्य विमर्शिन्यां उपयोगविशिष्टस्य परिणामालङ्कारस्य एकस्मिन् उदाहरणे आह-

"दाहोऽम्भः प्रसृतिपचः प्रचयवान्वाष्पः प्रणालोचितः
श्वासाः प्रेङ्खितदीप्रदीपकलिकाः पाण्डिम्नि मग्नं वपुः।
किं चान्यत्कथयामि रात्रिमखिलां तन्मार्गवातायने
हस्तच्छत्रनिरुद्धचन्द्रमहसस्तस्याःस्थितिर्वर्तते॥" [6] अत्र आरोपविषयः

हस्तः आरोप्यमाणं च छत्रम्। प्रकृते हस्ते अप्रकृतस्य छत्रस्य आरोप अस्ति। प्रकृते हस्ते अप्रकृतस्य छत्रस्य आरोपमन्तरेण चन्द्रातपरोध एव न भवतीति तस्य प्रकृतोपयोगित्वम्। अतः अत्र आरोप्यमाणं केवलं प्रकृतोपरञ्जकं न भवति, अपि तु आरोप्यमाणस्य छत्रस्य प्रकृतविषये हस्ते उपयोगोऽपि अस्तीति। सुतरां प्रकृतः हस्तः अप्रकृते छत्रे परिणमति- इत्यत्र परिणामालङ्कारः।

समासोक्ति-अलङ्कारेऽपि आरोप्यमाणस्य प्रकृतोपयोगो भवति, तत्र च आरोप्यमाणं आरोपविषयात्मतया स्थितम्। अतएव समासोक्त्यालङ्कारे व्यवहारसमारोपः स्यात्, न तु रूपकवत् रूपसमारोपः। यदि परिणामालङ्कारेऽपि समासोक्तिरिव व्यवहारसमारोपः स्यात्, तर्हि समासोक्तिपरिणामयोः पार्थक्यं किम्? समासोक्त्यालङ्कारे अभिधावृत्तिना केवलं विषयस्यैव प्रयोगः स्यात्, विषयी तत्र गम्यमानं भवेदिति। परिणामे तु उपमानोपमेययोः द्वयोरपि शब्दतः अभिधानं भवति, तत्र प्रकृताप्रकृतयोः तादात्म्यात् परिणामित्वम्- इति दर्शितम्। इदं हि परिणामालङ्कारस्य सौन्दर्यम्। प्रकृतोपयोगित्वम्, अनौचित्यम्, विषयस्य स्वरूपादप्रच्युतम्, उपमानोपमेययोरभिधानम्- एभिः वैशिष्टैरेव राजानकरुय्यकः अलङ्कारसर्वस्वे अन्यालङ्कारेभ्यः नवीनालङ्काररूपेण परिणामालङ्कारम् उपस्थापयति। एषा हि अलङ्कारसर्वस्वे परिणामालङ्कारचिन्तने रुय्यकस्य मौलिकता इति।

रुय्यकस्य मतानुसारेण परिणामालङ्कारः समानाधिकरण्य-वैयधिकरण्यप्रयोगाद् द्विविधमिति। समानाधिकरणस्य उदाहरणं यथा-

"तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीय-
स्तस्मै सौमित्रिमैत्रीमयमुपहृतवानातरं नाविकाय।
व्यामग्राह्यस्तनीभिः शवरयुवतिभिः कौतुकोदञ्चदक्षं
कृच्छ्रादन्वीयमानस्तरितमथ गिरिं चित्रकूटं प्रतस्थे॥" [7]

अत्र 'सौमित्रिमैत्रीम्' अर्थात् लक्ष्मणस्य मैत्री प्रकृतम् 'आतरं' च आरोप्यमाणम्। यथा 'मैत्रीम्' पदे द्वितीयाविभक्ते एकवचनम् तथा 'आतरम्' पदेऽपि द्वितीयाविभक्ते एकवचनस्य प्रयोगरस्ति। अतः पदद्वयं समानाधिकरण्ये स्थितम्। सुतरां उदाहरणेऽस्मिन् सौमित्रिमैत्री प्रकृता आरोप्यमाणसमानाधिकरणातररूपत्वेन परिणता। कुतः आतरस्य मैत्रीरूपतया प्रकृतोपयोगो भवति। विमर्शिनीकारेण जयरथेनोक्तम्- "अतश्च प्रकृते यत आतरस्योपयोगस्ततश्च प्रकृताया एव मैत्र्यास्तत्कार्यकारित्वात्तद्व्यवहारारोपः।" [8] अत्र अप्रकृतस्य आतरस्य न केवलं मैत्र्या सह तादात्म्यप्रतीतिमात्रं विवक्षते, अपि तु नदीतरणप्रत्युपकरणात्मकं प्रकृतोपयोगित्वमपि विवक्षितम्। अतः प्रकृतरूपापन्नस्य अप्रकृतस्य प्रकृतोपयोग

[2] तदेव- पृष्ठा-२३२

[3] अलंकारसर्वस्वम्- रुय्यकः, सम्पा, रेवाप्रसादद्विवेदी, पृष्ठा-७(भूमिका)

[4] श्रीकण्ठचरितम् – मङ्खकः, सम्पा, दुर्गाप्रसादः, पृष्ठा-३३९

[5] अलंकारसर्वस्वम्- रुय्यकः, सम्पा, रेवाप्रसादद्विवेदी, पृष्ठा-१३५

[6] अलंकारसर्वस्वम्- रुय्यकः, सम्पा, रेवाप्रसादद्विवेदी, पृष्ठा-१३७

[7] अलंकारसर्वस्वम्- रुय्यकः, सम्पा, रेवाप्रसादद्विवेदी, पृष्ठा-१३५

[8] अलंकारसर्वस्वम्- रुय्यकः, सम्पा, रेवाप्रसादद्विवेदी, पृष्ठा-१३७-३८

इति। अत्र सौमित्रिमैत्री प्रकृतमिदं स्वरूपात् प्रच्युतं न भवति तथा प्रकृतोपयोगत्वात् अप्रकृते परिणतं भवति। उदाहरणे प्रकृताप्रकृतयोः द्वयोरपि शब्दतः अभिधानत्वात् न समासोक्तिरलङ्कारः प्रकृतोपयोगत्वात् च न रूपकवदादि अन्यालङ्कारः, अपि तु अप्रकृतस्य प्रकृतरूपापन्नत्वात् तथा प्रकृतोपयोगत्वात् अत्र परिणामालङ्कारः स्यादिति भावः। अलङ्कारसर्वस्वस्य टीकाकारेण विद्याचक्रवर्तिनापि विषयेऽस्मिन् उक्तम्-

"प्रकृतरूपापन्नस्य प्रकृतोपयोग इति परिणामवीजभूतम्।" [9]
अनन्तरं वैयधिकरण्ये परिणामालङ्कारस्य उदाहरणे रुय्यक

आह- "अथ पक्त्रिमतामुपेयिवद्भिः सरसैर्वक्रपथाश्रितैर्वचोभिः।
क्षितिभर्तुरुपायनं चकार प्रथमं तत्परतस्तुरङ्गमाद्यैः॥" [10]
अत्र 'वचोभिः'

आरोपविषयः 'उपायनम्' आरोप्यमाणञ्च। 'वचोभिः' पदे तृतीयायाः वहुवचनं परन्तु 'उपायनम्' पदे द्वितीयायाः एकवचनस्य प्रयोगरस्ति। अतः पदद्वयं वैयधिकरण्ये स्थितम्। राजसंघटने उपायनमुचितम्। तच्चात्र वचोरूपमिति वचसां व्यधिकरणोपायनरूपत्वेन परिणामः। कुतः अप्रकृतस्य उपायनस्य वचरूपतया प्रकृते उपयोगो भवति। सुतरां आरोप्यमाणस्य प्रकृतरूपापन्नत्वात् तथा प्रकृतोपयोगित्वात् उदाहरणमिदं परिणामालङ्काररूपेण युक्तियुक्तम्। परवर्तीकाले शोभाकर–विद्यानाथ-विश्वनाथ – अप्पयदीक्षित – पण्डितराजजगन्नाथ- प्रभृतिभिः आचार्यैः रुय्यकप्रतिपादितः परिणामालङ्कारः स्वीकृतः।
एवम्प्रकारेण राजानकरुय्यकेन अलङ्कारसर्वस्वे नवीनार्थालङ्कारस्य परिणामालङ्कारस्य प्रस्तुतिकलायाः सौन्दर्यमुपस्थापितम्।

## *सन्दर्भग्रन्थाः*


1. Bhattacharya Biswanath- A History of Rupaka in the Alankara- astra, Varanasi, Chaukhambha Orientalia, 1982.
2. De S.K- History of Sanskrit Poetics, Calcutta, Firma KLM Private Limited,1976.
3. श्रीमङ्खकविरचितं श्रीकण्ठचरितम्- स्. पण्डितदुर्गाप्रसादः काशीनाथपाण्डुरङ्गश्च मुम्बइ, निर्णयसागरप्रेस, 1887.
4. श्रीमद्राजानकरुय्यकप्रणीतम् अलङ्कारसर्वस्वम्- स. कुमारी एस्.एस्.जानकी भि.राघवनश्च। दिल्ली, मेहरचन्द्र लक्ष्मणदास. 1965.
5. श्रीराजानक-रुय्यक-मङ्खकविरचितम् अलङ्कारसर्वस्वम्- स. रेवाप्रसाद द्विवेदि। वाराणसी, चौखम्भा संस्कृत संस्थान, संस्करण- षष्ठम्।


---

9 अलङ्कारसर्वस्वम्- रुय्यकः,सम्पा, कुमारी एस्.एस्.जानकी पृष्ठा-५४

10 अलङ्कारसर्वस्वम्- रुय्यकः,सम्पा, कुमारी एस्.एस्.जानकी पृष्ठा-५५